# ३ योहनः पत्रं

I प्राचीनो ऽहं सत्यमताद् यस्मिन् प्रीये तं प्रियतमं गायं
प्रति पत्रं लिखामि।
II हे प्रिय, तवात्मा यादृक् शुभान्वितस्तादृक् सर्व्वविषये तव
शुभं स्वास्थ्यञ्च भूयात्।
III भ्रातृभिरागत्य तव सत्यमतस्यार्थतस्त्वं कीदृक्
सत्यमतमाचरस्येतस्य साक्षये दत्ते मम महानन्दो जातः।
IV मम सन्तानाः सत्यमतमाचरन्तीतिवार्त्तातो मम य आनन्दो
जायते ततो महत्तरो नास्ति।
V हे प्रिय, भ्रातृन् प्रति विशेषतस्तान् विदेशिनो भृातृन्
प्रति त्वया यद्यत् कृतं तत् सर्व्वं विश्वासिनो योग्यं।
VI ते च समितेः साक्षात् तव प्रम्नः प्रमाणं दत्तवन्तः, अपरम्
ईश्वरयोग्यरूपेण तान् प्रस्थापयता त्वया सत्कर्म्म कारिष्यते।
VII यतस्ते तस्य नाम्ना यात्रां विधाय भिन्नजातीयेभ्यः
किमपि न गृहीतवन्तः।
VIII तस्माद् वयं यत् सत्यमतस्य सहाया भवेम तदर्थमेतादृशा
लोका अस्माभिरनुग्रहीतव्याः।
IX समितिं प्रत्यहं पत्रं लिखितवान् किन्तु तेषां मध्ये यो
दियत्रिफिः प्रधानायते सो ऽस्मान् न गृह्लाति।
X अतो ऽहं यदोपस्थास्यामि तदा तेन यद्यत् क्रियते तत्
सर्व्वं तं स्मारयिष्यामि, यतः स दुर्व्वाक्यैरस्मान् अपवदति,
तेनापि तृप्तिं न गत्वा स्वयमपि भ्रातृन् नानुगृह्लाति ये
चानुग्रहीतुमिच्छन्ति तान् समितितो ऽपि बहिष्करोति।
XI हे प्रिय, त्वया दुष्कर्म्म नानुक्रियतां किन्तु सत्कर्म्मैव। यः
सत्कर्म्माचारी स ईश्वरात् जातः, यो दुष्कर्म्माचारी स ईश्वरं न
दृष्टवान्।

XII दीमीत्रियस्य पक्षे सर्व्वैः साक्षयम् अदायि विशेषतः
सत्यमतेनापि, वयमपि तत्पक्षे साक्षयं दद्मः, अस्माकञ्च साक्षयं
सत्यमेवेति यूयं जानीथ।
XIII त्वां प्रति मया बहूनि लेखितव्यानि किन्तु मसीलेखनीभ्यां
लेखितुं नेच्छामि।
XIV अचिरेण त्वां द्रक्षयामीति मम प्रत्याशास्ते तदावां
सम्मुखीभूय परस्परं सम्भाषिष्यावहे।
XV तव शान्ति र्भूयात्। अस्माकं मित्राणि त्वां नमस्कारं
ज्ञापयन्ति त्वमप्येकैकस्य नाम प्रोच्य मित्रेभ्यो नमस्कुरु।इति।

# Sanskrit Bible (NT) in Devanagari Script (सत्यवेदः।)

## New Testament in Sanskrit Language; printed in Devanagari Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Devanagari script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.

Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

---

PDF generated using Haiola and XeLaTeX on 22 Feb 2024 from source files dated 29 Jan 2022
b86351f0-254a-576d-aa84-ea19df4455cb